# ॥ श्री आञ्जनेय ध्यानम् ॥

उद्यदातिय संकाशं उदार भुज विक्रमम् ।
कन्दर्प कोटि लावण्यं सर्व विद्या विशारदम् ॥ १ ॥

श्रीराम हृदयानन्दं भक्त कल्प महीरुहम् ।
अभयं वरदं दोर्भ्यां कलये मारुतात्मजम् ॥ २ ॥

अञ्जनानन्दनं वीरं जानकी शोकनाशनम् ।
कपीशं अक्षरहन्तारं वन्दे लङ्का भयङ्करम् ॥ ३ ॥

आञ्जनेयं अतिपाटलाननं
कञ्चनाद्रि कमनीय विग्रहम् ।
पारिजात तरुमूल वासिनं
भावयामि पवमान नन्दनम् ॥ ४ ॥

उल्लङ्घ्य सिन्धोः सलिलं सलीलं
यस्शोक वह्निं जनकात्मजाय ।
आदाय तेनैव ददाह लङ्कां
नमामि तं प्राञ्जलिराञ्जनेयम् ॥ ५ ॥

अतुलित बलधामं स्वर्ण शैलाभदेहं
दनुजवन कृशानं ज्ञानिनां अग्रगण्यम् ।
सकल गुण निधानं वानराणां अधीशं
रघुपति प्रिय भक्तं वातजातं नमामि ॥६॥

गोश्पदीकृत वारशिं मशकीकृत राक्षसाम् ।
रामायण महामालारत्नं वन्दे अनिलात्मजम् ॥७॥

यत्र यत्र रघुनाथ कीर्तनं
तत्र तत्र कृत मस्तकाञ्जलिम् ।
भाश्पवारि परिपूर्ण लोचनं
मारुतिं नमत राक्षसान्तकम् ॥८॥

अमिषीकृत मार्तंदं गोश्पदीकृत सागरम् ।
तृणीकृत दशग्रीवं आञ्जनेयं नमाम्यहम् ॥९॥

मनोजवं मारुततुल्यवेगं
जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वनरयूथमुख्यं
श्रीरामदूतं शिरसा नमामि ॥१०॥